१ गृहक्षेत्रपुत्रादिपोषणेषु व्यापृते २तेनैव व्याकुले ।

**अभ्याघात** पु० अभि+आ+हन–घञ् । १ आघाते २ ताड़ने च । करणे घञ् । ३ आघातोपद्रवे । "अभ्याघातेषु भक्ष्यस्यान् शिष्याच्चौरानिव द्रुतम्" मनुः "अभ्याघातेषु चौर्योपद्रवेषु" कुल्लू० ।

**अभ्याघातिन्** त्रि० अभि+आ+हन–ताच्छील्ये णिनि । हिंसाशीले । "अभ्याघातिभिरामिषाशातकैः परिराटिभिः" भट्टिः ।

**अभ्याचार** पु० अभि+आ+चर–घञ् । आभिमुख्येनाचरणे । "अवारयन्त वरणेन देवाअभ्याचारमसुराणाम्" अथ० १०,३,२

**अभ्याज्ञाय** पु० अभि+आ+ज्ञा–घञ् । अभिज्ञाने पूर्व्वज्ञातस्य तथात्वरूपेण ज्ञाने "तस्मिन् दक्षिणां दधाति तूपरौ मिथुनौ दद्यादित्यभ्याज्ञायेनैवमन्य" इति शत० ब्रा०

**अभ्यातान** पु० अभि+आ+तन–घञ् । अत्यन्तसन्ततौ ।

**अभ्यात्त** पु० अभि+आ+अत+सातत्ये कर्त्तरि क्त वेदे नि० । १सर्व्वव्यापके परमेश्वरे । "सर्व्वमिदमभ्यात्तोऽवाक्यनादरः" छा०उप० । "सर्व्वमिदं जगदभ्यात्तः अभिव्याप्तः अततेः व्याप्त्यर्थस्य कर्त्तरि निष्ठा" भा० । अभि+आ–दा–क्त । २आभिमुख्येन गृहीते त्रि० । [२ आरम्भे च ।

**अभ्यादान** न० अभि+आ+दा–ल्युट् । १ आभिमुख्येनादाने,

**अभ्याधान** न० अभित आधानम् । अभितोमन्त्रादिना वज्रादेराधाने "यानिध्मस्य परिदधात्यभ्याधानाय" शत० ब्रा० । [अभ्यमितशब्दे २७५ पृष्ठे विवरणम् ।

**अभ्यान्त** पु० अभि+अम–क्त नि० । रोगयुक्ते निष्पीड़िते

**अभ्यापत्ति** स्त्री अभि+आ–पद–क्तिन् । अभिमुखागमने ।

**अभ्यामर्द** अभि+आ+मृद–आधारे घञ् । १ रणे । भावे घञ् । २निष्पीड़ने ।

**अभ्यायंसेन्य** त्रि० अभि+आ+यम–कर्म्मणि बा० सेन्य । अभितो नियन्तव्ये । "वाससोऽभ्यायंसेन्या भवत मनीषिभिः" ऋ० १,३४,१, "अभ्यायंसेन्यौ अभितोनियन्तव्यौ" भा० ।

**अभ्यारम्भ** पु० अभि+आ+रभ–घञ् मुम् । प्रथमारम्भे

**अभ्यारूढ** त्रि० अभि+आ+रुह–क्त । सम्यगारूढ़े दृढे "तेनैव व्रतमभ्यारूढम्" शत० ब्रा० ।

**अभ्यारोह** पु० अभि+आ+रुह–घञ् । १ अभिमुखारोहणे ।आभिमुख्येनारोहति देवभावमनेन करणे घञ् । २मन्त्रजपभेदे "नन्विदमभ्यारोपजपविधिशेषोऽर्थवादः" इति ह०भा० । "श्रेयान् वा एषोऽभ्यारोहाद्भवति" शत० ब्रा० ।

**अभ्यारोहणीय** त्रि० अभि+आ+रुह–अनीयर् । आभिमुख्येनारोहणीये । शत० । अभ्यारोह्योऽप्यत्र ।

**अभ्यावर्त्त** त्रि० भि+आ+वृत–अच् । १ पुनः पुनरावर्त्तमाने "प्रजा वै बर्हीरेतः आज्यं तत्प्रजास्वेवैतत् रेतः सिच्यते तेन रेतसा सिक्तेनेमाः प्रजाः पुनरभ्यावर्त्तं प्रजायन्ते" शत० ब्रा० । भावे घञ् । २ सम्यगावृत्तौ पु० । अभि+आ+वृत–णिच् कर्म्मणि अच् । ३ पुनः पुनरावर्त्तनीये स्तोत्रादौ त्रि० । "चतुर्विंशाः पवमानाः त्रिवृदभ्यावर्त्तं चतुश्चत्वारिंशाः पवमानाः एकविंशमभ्यावर्त्तम् अष्टाचत्वारिंशाः पवमानास्त्रयस्त्रिंशमभ्यावर्त्तम्" शत० ब्रा० ।

**अभ्यावर्त्तिन्** त्रि० सम्यगावर्त्तते अभि+आ+वृत–णिनि । १ सन्ततं वर्त्तमाने । २वेदप्रसिद्धे चयमानराजपुत्रे पु० । "शेषोऽभ्यावर्त्तिने चायमानाय शिक्षन्" ऋ० ६, २७,५ । "अभ्यावर्त्ती चायमानो ददाति" ऋ० ६,२७,८ ।

**अभ्यावृत्त** पु० अभि+आ+वृत- उपसृष्टत्वात् कर्म्मणि क्त । आभिमुख्येन आनीते होमशेषद्रव्ये । "वातोऽभ्यावृत्तः" य० १,५८ । "अभ्यावृत्तः होमशेषीभूतः" वे०दी० ३ पुनःपुनरभ्यस्ते त्रि० ।

**अभ्यावृत्ति** स्त्री अभि+आ+वृत–क्तिन् । पौनःपुन्येनाभ्यासे "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" पा० । "मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी" माघः ।

**अभ्याश** पु० आभिमुख्येनाश्यते व्याप्यतेऽनेन अशू–व्याप्तौ करणे घञ् । निकटे । निकटस्थस्याभिमुखव्यापनात्तथात्वम् । २क्षिप्रे तस्याव्यवहितकालेन व्यापनात्तथात्वम् । "यएतदेवं विद्वान् साधु सामेत्युपास्ते अभ्याशोह यदेनं साधवोधर्म्मा अभ्यागच्छेयुः" छा०उ० । "अभ्याशः क्षिप्रम्" भा० "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्" । य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्" छा०उ० ।

**अभ्यास** पु० आभिमुख्येनास्यते क्षिप्यते अस–क्षेपे कर्म्मणि घञ् । १ निकटे । "चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी" कुमा० । अभेर्भृशार्थत्वे । २ पुनःपुनरनुशीलने पौनःपुन्येन करणे । "अमङ्गलाभ्यासरतिं विचिन्त्य तमिति" कुमा० । "अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ! "अभ्यासेन च कौन्तेय ! वैराग्येण च गृह्यते" । "अभ्यासेऽप्यसमर्थोऽसि मत्कर्म्मपरमोभव" ३ "अभ्यासयोगयुक्तात्मा ततो याति परां गतिम्" इति च गीता ४वेदादेरावृत्तौ च अभ्यासश्च पञ्चधा । "वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः । तद्दानञ्चैव शिष्येभ्योवेदाभ्यासो हि पञ्चधा"